# A-II/1/1355/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. चूडाकरणं कदा भवति ?
2. रिक्थपदेन किमुच्यते ?
3. निषेधस्य स्वरूपं किम् ?

**अथवा**

नियोगाः कति ?

4. के लेपभाजः ?
5. का नाम स्वधा ?
6. कः अपविद्धः ?

**अथवा**

विरुद्धत्रिकं किम् ?

7. सपिण्डः कः ?
8. नन्दपण्डितः कुत्रत्यः ?
9. वृद्धिश्राद्धं कतिविधम् ?

**अथवा**

कः विधिः नित्यं भवति ?

10. कः शौद्रपुत्रः ?
11. द्विपितृकः कः ?
12. कन्यायाः के रक्षकाः ?

**अथवा**

दासी का ?

13. कृत्रिमपुत्रस्य लक्षणं लिखत।

14. दक्षिणाजः कः?

15. पुत्रसंख्या त्रयोदशः इति केन प्रतिपादितम्?

**अथवा**

प्रयोजनं कतिविधम्?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. के पुत्रप्रतिनिधयः? सर्वं सम्यक् वर्णयत।

17. दत्तक-औरसयोः धनविभागप्रकारं विचारयत।

**अथवा**

क्षेत्रबीजयोर्मध्ये बीजस्य प्राधान्यं प्रतिपादयत।

18. कानि ऋणानि? तेषामपाकरणं प्रतिपादयत।

19. दत्तकपुत्रलक्षणं प्रतिपाद्य सदृशपदं व्याख्यात।

**अथवा**

धर्मशास्त्रोक्तनियोगविधिं स्पष्टयत।

20. दत्तकपुत्रस्य सापिण्ड्यं निरूपयत।

**अथवा**

"असपिण्डा च या मातुः" इति वचनं विशदयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. द्वादशविधानां पुत्राणां लक्षणं नामानि सप्रमाणं लिखत।

**अथवा**

द्यामुष्यायणस्योभयकुले त्रिपुरुषं सापिण्ड्यं कथमिति यथाग्रन्थं मीमांसत।

**अथवा**

द्वादशपुत्रेषु दत्तकस्य स्वरूपं महत्वं च नन्दपण्डितदिशा विमृशत।

# A-II/2/1356/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कालमाधवस्य मङ्गलाचरणं किमस्ति?
2. मूलप्रकृतेः स्वरूपं किमस्ति?
3. कुतपः स्वरूपं किम्?

**अथवा**

शुद्धानि पञ्चतत्वानि कानि?

4. वत्सरारम्भः कदा भवति?
5. के पञ्चप्रयाजाः?
6. अयनशब्दस्य व्युत्पतिः कथं भवति?

**अथवा**

का सकलातिथिः?

7. मध्वादिशब्दानां चैत्रादिपर्यायत्वं कथं भवति?
8. चातुर्मास्येष्टः कः?
9. वैशेषिकदर्शनकारः क?

**अथवा**

कुहूलक्षणं किम्?

10. आपूर्यमाणपक्षः कः?
11. सांख्यतत्त्वेषु षोडशविकृतयः के?
12. का नाम आमिक्षा?

**अथवा**

अनुपादेयं पञ्चकम्?

13. हव्यं किम्?

14. शिष्टाचारलक्षणं किम्?

15. धान्यव्रतं किम्?

**अथवा**

कति भावपदार्थाः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तिथिनिर्णयं कृत्वा तद्भेदं स्वरूपञ्च प्रतिपादयत।

17. मलमासे वर्ज्यानि कर्माणि लिखत।

**अथवा**

पक्षनिर्णयं ग्रन्थानुरूपं कुरुत।

18. आयुर्वेदोक्तपञ्चविद्यस्य सांवत्सरस्य स्वरूपं लिखत।

19. एकभक्तस्य षड्भेदान् यथाग्रन्थं प्रतिपादयत।

**अथवा**

"स्मृतिः प्रत्यक्षमैतिह्यम्" इत्यस्याः कारिकायाः सप्रसङ्गं व्याख्या कर्त्तव्या।

20. "कपर्दकान्वेषणाय प्रवृतश्चिन्तामणिमलाभन" इत्यस्य वसिष्ठरामायणोक्तभाणकस्य यथार्थ्यं प्रतिपादयत।

**अथवा**

प्राणाधिकरणस्य यथार्थं प्रकटयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. नित्यकालस्वरूपं विचारयत।

**अथवा**

संवत्सरनिर्णयं माधवदिशा कुरुत।

**अथवा**

अयाचितव्रतं यथाग्रन्थं विवृणत।

# A-II/3/1357/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. हिन्दुशब्देन कस्य बोधो भवति ?
2. कदा विचारालयेभ्यः पण्डिताः निष्कासिताः ?
3. के पराकाष्ठावादिनो भवन्ति ?

**अथवा**

हिन्दुविधिः कतिधा विभक्तः ?

4. व्यवहारसौख्यं केन प्रणीतम् ?
5. नारीणां दायाधिकारः कदा सञ्जातः ?
6. विवाहशब्देन किमवबुध्यते ?

**अथवा**

पूर्णरक्तजः कः ?

7. विवाहः कतिविधः ? के च ते ?
8. आधुनिकहिन्दुविवाहविधिः कदा प्रणीतः ?

**अथवा**

संसृष्टिः इत्यस्य अर्थः कः ?

9. अनुलोमविवाहः कः ?
10. कदा स्त्री भार्य्यापदेनोच्यते ?

**अथवा**

उद्वाहशब्दः कस्य कृते प्रयुज्यते ?

11. कं प्रदेशं विहाय भारतवर्षे विद्यमानानां हिन्दूनां कृते हिन्दूत्तराधिकारविधिः समुद्दिष्टो भवति ?
12. अवैधसन्तान इत्युक्ते के बोध्यन्ते ?

13. केन विवाहेन पुरुषः सप्तपुरुषान् पुनाति ?

**अथवा**

कति धर्म्याः विवाहाः ?

14. गान्धर्वविवाहलक्षणं किम् ?

15. हिन्दुविधेः मूलग्रन्थः कः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आधुनिकहिन्दुविधेः स्वरूपं विवेचयत।

**अथवा**

स्वाधीनतापरवर्त्तिकालीनविधयः के ? प्रकटयत।

17. हिन्दुविधेः स्त्रोतांसि प्रकटयत।

18. कन्यादातृक्रमं निरूपयत।

**अथवा**

हिन्दुनारीणां धनाधिकारं विवेचयत।

19. प्रथमश्रेणीदायदान् उल्लिखत।

20. हिन्दुविवाहस्य पञ्जीकरणं कथमिति उपपादयत।

**अथवा**

असिद्धाऽसिद्धयोग्यविवाहजनितसन्तानानां वैधताम् आलोचयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. आधुनिकहिन्दुविधेः उत्पत्तिं क्रमविकासञ्च ग्रन्थोक्तदिशा निरूपयत।

**अथवा**

हिन्दुविवाहविधेः न्यायिकपृथक्करणं ग्रन्थोक्तदिशा प्रतिपादयत।

**अथवा**

विभागे केऽशभाजः, के च तत्र नियमा इति प्रतिपादयत।

# A-II/4/1358/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सनातनशब्दस्य का व्युत्पत्तिः?
2. सनातनधर्मे कति आश्रमाः? नामानि लिखत।
3. सदाचारस्य का परिभाषा?

**अथवा**

ऋग्वेदस्य रचनाकालं लिखत।

4. पैगम्बरहजरतमुहम्मदस्य जन्म कदा कुत्र च जातः?
5. इस्लामशब्दस्य कोऽर्थः?
6. इस्लामधर्मे सलातः कः?

**अथवा**

इस्लाममतानुसारं "वुजु" इत्यस्य कोऽर्थः?

7. "जकात्" इत्यनेन किमभिधीयते?
8. इस्लामधर्मस्य मूलमन्त्रः कः?
9. इस्लामधर्मे "आयत" इत्यनेन किमभिधीयते?

**अथवा**

इस्लामधर्मे कति मुख्यकर्माणि भवन्ति?

10. महावीरतीर्थंकरस्य जन्म कुत्र अभवत्?
11. कः पुद्गलः?
12. कः आश्रवः?

**अथवा**

जैनमते कति सूत्रग्रन्थाः?

13. ईसामसीहस्य प्रधानोपदेशः कः ?

14. ईसाईधर्मस्य मूलाधारः कः ?

15. निर्जरा कतिविधा ? जैनमतानुसारं लिखत।

**अथवा**

चन्द्रभस्य जन्म कुत्र कदा चाभवत् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. सनातनधर्मानुसारं वर्णव्यवस्थामालोचयत।

17. सनातनधर्मस्य कर्मसिद्धान्तं स्पष्टयत।

**अथवा**

जैनधर्मस्य के मूलसिद्धान्ताः ?

18. जैनधर्मस्य प्रमुखग्रन्थानां विवेचनं कुरुत।

19. इस्लाममते आत्मोन्नतेः के उपायाः ? लिखत।

**अथवा**

इस्लामधर्मस्य "शिया" इति सम्प्रदायसिद्धान्तान् विवेचयत।

20. ईसाईमतानुसारं नीतिविचारानालोचयत।

**अथवा**

ईसाईमतानुसारं स्वर्गविचारानालोचयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. सनातनधर्मस्य प्रमुखाचार्याणां विवेचनं कुरुत।

**अथवा**

मोक्षविषये इस्लामसनातनमतयोः तुलना कार्या।

**अथवा**

जैनधर्मे तीर्थंकरपरम्पराविषये विशदं वर्णयत।

# A-II/5/1359/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## धर्मशास्त्रम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. धर्मशब्दस्य का व्युत्पत्तिः?
2. वैशेषिकानां मतेन धर्मलक्षणं किम्?
3. प्रथमधर्मशास्त्रकारः कः?

**अथवा**

धर्मस्य मूलं किमस्ति?

4. धर्मे कानि प्रमाणानि भवन्ति?
5. धर्मभेदाः के भवन्ति?
6. सूत्रलक्षणं किमस्ति?

**अथवा**

योगीश्वर-याज्ञवल्क्यः कुत्रत्यो भवति?

7. हारीतमतानुसारं व्यवहारलक्षणं किम्?
8. धर्मस्य का परिभाषा?
9. षड्स्मार्त्तधर्माः के भवन्ति?

**अथवा**

10. धर्मशास्त्रप्रयोजकाः के भवन्ति?
11. निधनेऽप्यनुयाति कः?
12. गौतमधर्मसूत्रस्य के टीकाकाराः भवन्ति?

**अथवा**

भाष्यलक्षणं किं भवति?

13. प्रतापरुद्रदेवः कुत्रत्यः ?

14. मनुस्मृतेः कति टीकाः सन्ति ?

15. हारीतस्य व्यवहारलक्षणं किम् ?

**अथवा**

विष्णुस्मृतेः वैजयन्तीटीकाकारः कः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. मनुस्मृतेः टीकाकाराणां नामानि लिखत।

17. स्मृतिकारस्य नारदस्य परिचयं प्रतिपादयत।

**अथवा**

धर्मशास्त्रस्य स्वरूपं यथाग्रन्थं प्रतिपादयत।

18. अर्थशास्त्रकारेषु कौटिल्यस्य महत्वं वर्णयत।

19. माधवाचार्यस्य संक्षिप्तपरिचयं लिखत।

**अथवा**

जीमूतवाहनस्य देशकालं निरूपयत।

20. उत्कलीयस्मृतिनिबन्धकाराणां नामानि  कृतीश्च वर्णयत।

**अथवा**

प्रमुखभाष्यकाराणां नामानि कृतीश्च लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. धर्मशास्त्रस्य श्रेणीविभागं कुरुत।

**अथवा**

धर्मसूत्राणामुद्भवं विकासं च वर्णयत।

**अथवा**

मैथिलधर्मनिवन्धृषु चण्डेश्वरस्य योगदानं लिखत।